# Shri Komalambasameta Sharngapanistutih

# શ્રીકોમલામ્બાસમેત શાર્ઙ્ગપાણિસ્તુતિઃ

## Document Information

Text title : komalAmbAsametashArngapANistutiH

File name : komalAmbAsametashArngapANistutiH.itx

Category : vishhnu, devii, devI

Location : doc_vishhnu

Proofread by : PSA Easwaran psawaswaran at gmail.com

Description/comments : Edited by S. V. Radhakrishna Shastriji

Acknowledge-Permission: Mahaperiaval Trust

Latest update : May 13, 2018

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

# શ્રીકોમલામ્બાસમેત શાર્ઙ્ગપાણિસ્તુતિઃ

(કુમ્ભકોણસ્થલે)
ત્રયસ્ત્રિંશત્કોટિ ત્રિદશગણસંસેવિતપદઃ
સહ શ્રીભૂમિભ્યાં કનકનલિનીરોધસિ વસન્ ।
અમન્દાનાનન્દાન્ સ્વયમવકિરન્ સેવકદૃશોઃ
મુકુન્દઃ શાર્ઙ્ગાસ્ત્રો મનસિ મમ નિત્યં વિહરતુ ॥ ૧॥

કુશલમવનતાનાં કુમ્ભકોણસ્થલે યઃ
કલયતિ નિવસન્ વૈ કાઞ્ચનાબ્જિન્યુપાન્તે ।
કુલિશધરમુખેભ્યઃ કોમલામ્બાસહાયઃ
સ ભવતુ મમ ચિત્તે સન્તતં શાર્ઙ્ગધન્વા ॥ ૨॥

ત્રિંશત્ત્રકોટિ વસુરુદ્રદિવાકરાદિ
દેવાદિદેવગણસમ્મતસેવ્યમાનમ્ ।
અમ્ભોજસમ્ભવચતુર્મુખગીયમાનં
વન્દે શયાનમિહ ભોગિનિ શાર્ઙ્ગપાણિમ્ ॥ ૩॥

ઉત્તાનશાયિનમુદારકિરીટચૂડં
ઉત્ફુલ્લપદ્મનયનં હ્યુપધાનબાહુમ્ ।
આજાનુબાહુમમલં ફણિરાજતલ્પે
શાર્ઙ્ગેશમચ્યુતમહં પ્રણતોઽસ્મિ નિત્યમ્ ॥ ૪॥

સકલભુવનમાતા સાગરાધીશજાતા
પ્રણમદમરકામા ભાસ્કરક્ષેત્રધામા ।
શકલિતભવમૂલા શાર્ઙ્ગધન્વાનુકૂલા
પ્રવિમલમુખબિમ્બા પાતુ માં કોમલામ્બા ॥ ૫॥

મથિતાદમૃતામ્ભોધેરવતારમવાપ્ય યા ।
જગતામભયં ચક્રે તનુતાં કોમલા શ્રિયમ્ ॥ ૬॥

ઇતિ કુમ્ભકોણસ્થલે શ્રીકોમલામ્બાસમેત શાર્ઙ્ગિપાણિસ્તુતિઃ સમાપ્તા ।

Proofread by PSA Easwaran

*Shri Komalambasameta Sharngapanistutih*
pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*